शास्त्री प्रथम खण्डस्य कृते (प्राचीनम्)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या।

'यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥'

प्रस्तुतोऽयं श्लोकः 'पुराकवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्तिदिशा कविमण्डलमण्डनायमानेन अप्रतिम प्रातिभ सम्पत्ति मालभमानेन, कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य निखिल नाट्यतत्त्व भूतस्य काव्यकला समन्वितस्य, सर्वथा नव नवस्य नाट्य साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य नवनीत स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति।

श्लोकेऽस्मिन् यदा शकुन्तला पतिगृहं याति तदा तस्याः कृतकपुत्रः काश्चिन्मृगशावकः भूयोभूयः शकुन्तलायाः पदान्ते सज्जते। शकुन्तला वातिमश्रुः उपयाति यदा 'कः मम वसनान्ते सज्जते' इति पृच्छति तदा कण्वस्तां कथयति —

वत्से! यस्य कुशसूचि विद्धे मुखे त्वया व्रणविरोपणम् इङ्गुदीनां तैलं न्यषिच्यत श्यामाकमुष्टिपरिवर्धितकः सः अयं ते पुत्रकृतकः मृगः ते पदवीं न जहाति।

वत्से = पुत्रि! यस्य = मृगशावकस्य कुशानां = दर्भाणां सूच्यिभिः अग्रभागैः विद्धे मुखे = आनने त्वया = शकुन्तलया व्रणविरोपणं = व्रणनिवारकम्, इङ्गुदीनां तैलद्रव्य विशेषाणां तैलं = स्नेहं न्यषिच्यत = सिक्तम् श्यामाकानां = धान्यविशेषाणां मुष्टिभिः = मुष्टिपरिमाणैः परिवर्धितकः = पालितः पोषितश्च सोऽयं ते = तव कृतकपुत्रः मृगः = हरिणशिशुः ते = तव पदवीं मार्गं न जहाति = त्यजति।

अत्र पदवीपरित्यागाभावं प्रति पूर्ववाक्यानां हेतुत्वात् काव्यलिङ्गमलङ्कारः — हेतोर्वाक्य पदार्थते काव्यलिङ्गं निगद्यते इति लक्षणात्। पालितस्य मृगस्य स्वभावोक्तिः स्वभावोक्तिरलङ्कारश्चेति तेन सङ्करालङ्कारोऽपि। वसन्ततिलका वृत्तम् - उक्ता वसन्ततिलका तभजाजगौ गः इति लक्षणात्।

उपेन्द्र झा
17/12/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
पुरोना, बंगाली

Dec 17, 2020

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
षष्ठः परिच्छेदः साहित्यदर्पणः

---

नाटकस्य लक्षणं तत्र केषां-केषां कार्याणां प्रतिपादनं दर्शनं वा निषिद्धम् इति प्रतिपादनम्।

नाटकस्य वृत्तं रामायणादि प्रसिद्धं भवेत्। पञ्चसन्धिभिः युक्तं विलासर्ध्यादिगुणैः नाना विभूतिभिः युक्तं नाना ऐश्वर्य व्याप्तं भवेत्। नाना सुख दुःखं समुत्पत्ति वृत्तिनाट्यपात। तत्र आधिकारिके च दशाङ्कम् नाटकं भवति। न्यूनान्यूनं पञ्चाङ्कम्, रामायणमहाभारतादि प्रसिद्धो राजर्षिः धीरोदात्तः नायकश्चात्र दिव्यो यथा - श्री कृष्णः, अथ अदिव्यो यथा - कुरुवंशोत्पत्तिः, दिव्यादिव्यश्च यो दिव्योऽपि आत्मनि नराभिमानी यथा - श्री रामचन्द्रः, इत्येतानुरोध भवेत्। नाटके शृङ्गार वीरादिषु एकः एव प्रधान रसो भवति। अन्ये च रसाः तदङ्गभूताः। यथा - शाकुन्तले शृङ्गारः, वेणी संहारे वीरः, उत्तररामचरिते करुण विप्रलम्भः, प्रबोध चन्द्रोदये शान्तरस। तत्रापि निर्वहण सन्धौ अद्भुतं कर्तव्यम्। चत्वारः पञ्च वा पुरुषास्तत्र कार्ये निरता भवेयुः। तस्य विरचनं च गोपुच्छ इति केचित्। अन्येवाहुः - यथा गोपुच्छे केचिद् वालाः ह्रस्वाः केचिद् दीर्घाः तथात्र कानिचित कार्याणि मुख सन्ध्यौ समाप्तानि कानिचित प्रतिमुखे। एवमन्येष्वपि कानिचित्, कानिचित् इति।

नाटके च दूराह्वानं वधो युद्धं विवाहो, भोजनं शापो, मलमूत्र त्यागो मृत्युः रतिक्रिया ओष्ठदंश दन्तक्षातौ नखक्षतैः, अन्यच्च यद् यद् लज्जाजनकं शयनाधरपानादि नगरादि प्रतिरोधनं स्नानम् अनुलेपनञ्च इत्यादीनि न वर्णनियानीति।

---

उपेन्द्र झा
17/12/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
धुरिहैला, मुनिगुँ

Dec 17, 2020

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

साहित्य दर्पणः दशमः परिच्छेदः

पुनरुक्तवदाभासस्य शब्दालङ्कारत्वम्, अर्थालङ्कारत्वम्, उभयालङ्कारत्वं वेति सप्रमाणं निरूपयाम्।

'आपाततो यदर्थस्य पौनरुक्त्येन भासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥' इति

श्रवणमात्रेणैव प्रतीतिः न तु तात्पर्यालोचनात् परमपि अभिधेयस्य यत्पुनरुक्ततया प्रतीतिः भिन्नाकारशब्दाश्रितः स पुनरुक्तवदाभासो नामालङ्कार उच्यते। यथा —

'भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः॥'

अत्र भुजङ्ग-कुण्डलीति सर्पार्थकयोः शब्दयोः शशि-शुभ्रांशु-शीतगुरिति चन्द्रार्थकानां शब्दानां हर-शिवेति महादेवार्थकयोः शब्दयोः पायादव्यादिति रक्षणार्थकक्रिययोश्च श्रुतिमात्रेणैव तत्तदर्थस्य पुनरुक्तत्वेन प्रतीतिः पर्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्य, तथा व्यक्तः = प्रकाशितः, शशी = शशयुक्तः, शुभ्रांशुः = श्वेतकिरणः, शीतगुः = चन्द्रो यस्य तादृशः, चेतोहरः = मनोहरः, शिवः = महादेवः, अपायात् = विनाशात्, जगन्ति = लोकान्, अव्यात् = रक्ष्यात्, इत्यादि रूप भिन्नार्थ प्रतीतेः पुनरुक्तवदाभासोऽलङ्कारः। 'पायादव्यात्' इत्यत्र क्रियागतोऽयमलङ्कारः।

ननु शब्दगतोऽयमलङ्कारोऽर्थगतो वोभयगतो वेति चेत्? श्रूयताम्। भुजङ्ग-कुण्डलीति शब्दयोर्मध्ये प्रथमस्य = भुजङ्ग-शब्दस्यैव परिवृत्तिसहत्वं न तु कुण्डलीशब्दस्य। अतः शब्दपरिवृत्ति सहत्वासहत्वाभ्यां 'भुजङ्ग' इत्यत्र पुनरुक्तवदाभासस्य आर्थत्वम्, कुण्डलीत्यंशे पुनरुक्तवदाभासस्य शाब्दत्वम्। हर-शिवेति शब्दयोर्मध्ये द्वितीयस्य शिवस्यैव परिवृत्ति सहत्वं न तु प्रथमस्य हरस्येति। अतः हरः इत्यत्र पुनरुक्तवदाभासस्य शाब्दत्वं शिवेत्यंशे च आर्थत्वम्। शशिशुभ्रांशुशीतगुः इत्यत्र त्रयाणामपि परिवृत्ति सहत्वम्। तेन त्रितयांशे पुनरुक्तवदाभासस्य केवलं आर्थत्वम्। एवं शब्दपरिवृत्ति सहत्वासहत्वाभ्यां अस्य उभयालंकारत्वं ज्ञेयमिति दिक्

उपेन्द्र झा
17/12/20
असि० प्रो० साहित्य
रा० उ० सं० महावि०
कुसहेला, पूर्णियाँ

Dec 17, 2020